# भारतीय शिक्षा बोर्ड
## मॉड्यूल प्रश्न पत्र - I$^{st}$ Term
## संस्कृत - कक्षा 6
## सत्र: 2025-26

**निर्धारित समय : 1 घंटा** **अधिकतम अंक : 20**

**निर्देश:**

- प्रश्नों को ध्यानपूर्वक पढ़ें।
- प्रश्न पत्र को पढ़ने के लिए अतिरिक्त **10** मिनट का समय दिया जाएगा। इस दौरान छात्र केवल प्रश्न पत्र पढ़ेंगे।
- इस प्रश्न पत्र में कुल चार खंड हैं। प्रत्येक खंड में 1 प्रश्न है।
- **खंड क** में **1** प्रश्न है, जिसकी प्रश्न संख्या **1** है, प्रश्न संख्या **1** में **5** उप प्रश्न हैं, प्रत्येक उप प्रश्न के लिए **1** अंक निर्धारित किया गया है।
- **खंड ख** में **1** प्रश्न है, जिसकी प्रश्न संख्या **2** है, प्रश्न संख्या **2** के लिए **5** अंक निर्धारित किए गए है।
- **खंड ग** में **1** प्रश्न है, जिसकी प्रश्न संख्या **3** है, प्रश्न संख्या **3** के लिए **5** अंक निर्धारित किए गए है।
- **खंड घ** में **1** प्रश्न है, जिसकी प्रश्न संख्या **4** है, प्रश्न संख्या **4** के लिए **5** अंक निर्धारित किए गए है।

---

## खण्ड - क (अपठित - अवबोधनम्)

**प्रश्न 1. अपठितगद्यांशं पठित्वा उत्तराणि संस्कृतेन लिखत -**

वने एकः सिंहः निवसति स्म । सिंहः गुहायां शयनं करोति स्म । कोऽपि मूषकः तत्र आगत्य सिंहस्य शरीरे अधावत् । कुपितः सिंहः मूषकं करे गृह्णाति। मूषकः निवेदयति "मां मा मारय अहं तव सहायतां करिष्यामि ।" सिंहः हसन्अवदत् "लघुमूषकः मम सहायतां करिष्यति ?" एकदा सिंहः जाले अपतत् । सः उच्चैः अगर्जत् । तस्य गर्जनं श्रुत्वा मूषकः आगच्छत्। सः जालं दन्तैः अकर्तयत्। बन्धनमुक्तः सिंहोऽवदत्- "मित्रं तु लघुः अपि वरम् ।"

(i) उपर्युक्तगद्यांशस्य कृत उचितं शीर्षकं लिखत ।

(ii) मूषकः जालं कैः अकर्तयत् ?

(iii) सिंहः कुत्र शयनं करोति स्म ?

(iv) सिंहस्य शरीरे कः अधावत् ?

(v) एकदा जाले कः अपतत् ?

## खण्ड - ख (रचनात्मक - लेखनम्)

**प्रश्न 2. पदानि यथायोगं स्थापयित्वा वाक्यं रचयत-**

(क) नारदं / परिपप्रच्छ / वाल्मीकिः / तपस्वी

(ख) गुणवान्/क : / लोके / साम्प्रतम्

(ग) श्रुतः / नाम / जनैः / रामः

(घ) दुर्लभाः / त्वया / बहवः / ये / कीर्तिताः / गुणाः

(ङ) वश्यः / रामः / शुचिः / अस्ति / समाधिमान्

## खण्ड - ग (अनुप्रयुक्तं व्याकरणम्)

**प्रश्न 3. अधोलिखितवाक्यानां मातृभाषया अनुवादं कुरुत-**

(क) भारतम् अस्माकं देशः अस्ति ।

(ख) भारतमाता शस्यश्यामला अस्ति ।

(ग) अहं भारतमातरं नमामि ।

(घ) अहं भारतदेशे निवसामि ।

(ङ) अहं वन्दे मातरम् इति गीतं गायामि ।

## खण्ड - घ (पठित - अवबोधनम्)

**प्रश्न 4. निम्नलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

वनानां रक्षणार्थम् उत्तराखण्डस्य 'चिपको आन्दोलनम्' बहु प्रसिद्धम् अस्ति । एतत् चिपको आन्दोलनम् एकोनविंशशतकात्परं त्रिसप्ततितमे (१९७३) ईशाब्दे अभवत्। इदं जनान्दोलनं वृक्षाणां संरक्षणाय आसीत्। अस्य जनान्दोलनस्य आरम्भं भोटियाजनजातेः नेतृत्वकारिणी श्रीमती गौरादेवी अकरोत्। सामान्यतः वनवासिनां समाजे जीवनस्य सर्वेषु क्षेत्रेषु महिलानां क्रियाकलापाः पुरुषाणाम् अपेक्षया अधिकाः भवन्ति। तथापि स्वस्य पारिवारिकजीवने अनेकानि कष्टानि सोढ्वा गौरादेवी स्वसन्ततिं पालितवती, यदा संतानाः स्वावलम्बिनः अभवन् तदा परोपकार-परायणा गौरादेवी वनसंरक्षणार्थ समाजसेवार्थञ्च रैणी इति नामकस्य महिलादलस्य सङ्घटनं कृतवती । सप्तविंशतेः महिलानाम् एतद् दलम् स्वलक्ष्यसिद्धये अतीव सक्रियं जागरूकञ्चासीत्।

**(i) एकपदेन उत्तरयत -**

(क) "चिपको आन्दोलनम्" कदा अभवत् ?

(ख) "चिपको आन्दोलनम्" कस्य रक्षणार्थम् अभवत् ?

**(ii) पूर्ण वाक्येन उत्तरयत-**

(क) गौरादेवी केन कारणेन रैणी नामकस्य महिलादलस्य सङ्घटनं कृतवती ?

(ख) गौरादेवी कथं स्व्संततिमं पालितवती ?

**(ग) भाषिकाधारिता: प्रश्नाः -**

(1) चिपको आन्दोलनस्य' आरम्भं कः अकरोत् ?

(क) इन्दिरा गांधी (ख) गौरा देवी (ग) किरण बेदी (घ) अन्ना हजारे

(2) "एतद् दलम् स्वलक्ष्यसिद्धये अतीव सक्रियं जागरूकञ्च आसीत्।"

(क) दलम् (ख) जागरूकम् (ग) आसीत् (घ) स्वलक्ष्यसिद्धये